उपनिषदे

शिक्षा

ब्रह्मविद

[illegible]

[illegible]

(९६)

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

(1)

२६

धर्मशास्त्रादि ग्रंथसंग्रहालय. धुळें

उपनिषदें

~~[illegible]~~

शिक्षा, ब्रह्मविद्या, भट्ट, नारायण.

चिति

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

१ ॐ गणेशायनमः।श्रीसदाशिवायपरमात्मनेनमः॥हरिः ॐ शन्नोमित्रःशंवरुणः
(2) ॥शन्नोभवत्वर्यमा॥शन्नऽइंद्रोबृहस्पतिः॥शन्नोविष्णुरुरुक्रमः॥नमोब्रह्मणे॥नम
स्तेवायो॥त्वमेवप्रत्यक्षंब्रह्मासि॥त्वमेवप्रत्यक्षंब्रह्मवदिष्यामि॥ऋतंवदिष्यामि॥सत्यं
वदिष्यामि॥तन्मामवतु॥तद्वक्तारमवतु॥अवतुमां॥अवतुवक्तारं॥ॐशांतिःशांतिः
शांतिः॥हरिः ॐ शीक्षांव्याख्यास्यामः॥वर्णःस्वरः।मात्राबलं॥सहनौब्रह्मव
र्चसं॥अथातःसंहितायाउपनिषदंव्याख्यास्यामः।पंचस्वधिकरणेषु॥अधिलोक
मधिज्यौतिषमधिविद्यमधिप्रजमध्यात्मं।तामहासंहिताइत्याचक्षते॥अथा श्री
धिलोकं।पृथिवीपूर्वरूपं॥द्यौरुत्तररूपं।आकाशःसंधिः॥१॥वायुःसंधानं॥
इत्यधिलोकं॥अथाधिज्यौतिषं॥अग्निःपूर्वरूपं।आदित्यउत्तररूपं।आपःसंधिः
वैद्युतसंधानं।इत्यधिज्यौतिषं॥अथाधिविद्यं॥आचार्यःपूर्वरूपं॥२॥अंतेवास्यु
त्तररूपं॥विद्यासंधिः।प्रवचनंसंधानं॥इत्यधिविद्यं॥अथाधिप्रजं॥माता
१

Joint project of Rajawade Sanshodhan Mandal, Dhule and ... Pratishthan, Mumbai

(2A) पूर्वरूपं पितोत्तररूपं ॥ प्रजासंधिः ॥ प्रजननं॰ संधानं ॥ इत्याधिप्रजं ॥ ३ ॥ अथाध्यात्मं ॥ अ
धराहनुः पूर्वरूपं ॥ उत्तराहनुरुत्तररूपं ॥ वाक्संधिः ॥ जिह्वासंधानं ॥ इत्यध्यात्मं ॥ इ
तीमामहासं॰हिताः ॥ यएवमेतामहासं॰हिताव्याख्यातावेद ॥ संधीयतेप्रज
यापशुभिः ॥ ब्रह्मवर्चसेनान्नाद्येनसुवर्गेणलोकेन ॥ ४ संधिराचार्यः पूर्वरू
पमित्यधिप्रजं लोकेन ॥ ४ ॥ यश्छंदसामृषभोविश्वरूपः ॥ छंदेभ्योध्यमृतात्सं
बभूव ॥ समेंद्रोमेधयास्पृणोतु ॥ अमृतस्यदेवधारणोभूयासः ॥ शरीरंमेविचर्ष
णं ॥ जिह्वामेमधुमत्तमा ॥ कर्णाभ्यांभूरिविश्रुवं ॥ ब्रह्मणः कोशोसिमेधयापि
हितः ॥ श्रुतंमेगोपाय ॥ आवहंतीवितन्वाना ॥ ५ ॥ कुर्वाणाचीरमात्मानः ॥ वासां॰
सिममगावश्च ॥ अन्नपानेसर्वदा ॥ ततोमेश्रियमावह ॥ लोमशांपशुभिःसहस्वा
हा ॥ आमायंतुब्रह्मचारिणः स्वाहा ॥ विमायंतुब्रह्मचारिणः स्वाहा ॥ प्रमायंतुब्र
ह्मचारिणःस्वाहा ॥ दमायंतुब्रह्मचारिणः स्वाहा ॥ शमायंतुब्रह्मचारिणः स्वाहा ॥ यशोज

Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

२ (3)

१ सानि १

नेसानिस्वाहा ॥ श्रेयान्वस्यसोऽस्वाहा ॥ तंत्वा भग प्रविशानिस्वाहा ॥ समा भगं प्रविशस्वा
हा ॥ तस्मिन्सहस्रशाखे ॥ नि भगाहं त्वयि मृजे स्वाहा ॥ यथापः प्रवतायंति ॥ यथा मा
सा अहर्जरं ॥ एवं मां ब्रह्मचारिणः ॥ धातरायंतु सर्वतः स्वाहा ॥ प्रतिवेशोसि प्रमा भा
हि प्रमापद्यस्व ॥ वितन्वाना शमायंतु ब्रह्मचारिणः स्वाहा ० ॥ धातरायं सर्वतः स्वाहे
कंच ॥ ४ ॥ भूर्भुवः सुवरिति वा एतास्तिस्रो व्याहृतयः ॥ तासामुहस्मैतां च तुर्थी ॥ माहा
चमस्यः प्रवेदयते ॥ मह इति ॥ तद्ब्रह्म ॥ स आत्मा ॥ अंगान्यन्या देवताः ॥ भूरिति वा अयं लो
कः ॥ भुव इत्यंतरिक्षं ॥ सुवरित्यसौ लोकः ॥ मह इत्यादित्यः ॥ आदित्येन वाव सर्वे लोका —श्री४
महीयंते ॥ भूरिति वा अग्निः ॥ भुव इति वायुः ॥ सुवरित्यादित्यः ॥ मह इति चंद्रमाः ॥ चंद्रम
सा वाव सर्वाणि ज्योतींषि महीयंते ॥ भूरिति वा ऋचः ॥ भुव इति सामानि ॥ सुवरिति यजूं व
षि ॥ मह इति ब्रह्म ॥ ब्रह्मणा वाव सर्वे वेदा महीयंते ॥ भूरिति वै प्राणः ॥ भुव इत्य
पानः ॥ सुवरिति व्यानः ॥ मह इत्यन्नं ॥ अन्नेन वाव सर्वे प्राणा महीयंते ॥ ॥ ता वा एताश्च
तस्रश्चतुर्धा ॥ चतस्रश्चतस्रो व्याहृतयः ॥ ता यो वेद ॥ स वेद ब्रह्म ॥ सर्वेऽस्मै देवा बलिमाव

(3A)

ऽति ॥३॥ असौलोकोयजूंषि वेद वच पसयस्योंतौरे हृदय आकाशः ॥तस्मि
न्नयंपुरुषोमनोमयः ॥ अमृतोहिरण्मयः ॥ अंतरेणतालुके ॥ व्यपोह्यशीर्षकपालि
यएषस्तनइवावलंबते ॥ सेंद्रयोनिः ॥ यत्रासौकेशांतोविवर्तते ॥ व्यपोह्यशीर्षक
पाले ॥ भूरित्यग्नौप्रतितिष्ठति ॥ भुवइतिवायौ ॥ सुवरित्यादित्ये ॥ ॥ महइतिब्रह्म
णि ॥ आप्नोतिस्वाराज्यं ॥ आप्नोतिमनसस्पतिं ॥ वाक्पतिश्चक्षुष्पतिः ॥ श्रोत्रपतिर्विज्ञानप
तिः ॥ एतत्ततोभवति ॥ आकाशशरीरंब्रह्म ॥ सत्यात्मप्राणारामंमनआनंदं ॥ शांतिस
मृद्धममृतं ॥ इतिप्राचीनयोग्योपास्स्व ॥ ॥ पावमृतमेकंच ॥ पृथिव्यंतरिक्षंद्यौर्दिशो
वांतरदिशा ॥ अग्निर्वायुरादित्यश्चंद्रमानक्षत्राणि ॥ आपओषधयोवनस्पतयआ
काशआत्मा ॥ इत्यधिभूतं ॥ अथाध्यात्मं ॥ प्राणोव्यानोपानउदानःसमानः ॥
चक्षुःश्रोत्रंमनोवाक् ॥ चर्ममांसंस्नावास्थिमज्जा ॥ एतदधिविधायऋषिरवोचत् ॥
पांक्तंवाइदंसर्वं ॥ पांक्तेनैवपांक्तंस्पृणोतीति ॥ सर्वमेकंच ॥ ॐमितिब्रह्म ॥ ओमि

Joint Project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

३ (५)

ती
मीदं᳚सर्वं ॥ ओमित्येतदनुकृतिर्हस्मवा अप्योश्रावयेत्याश्रावयंति ॥ ओमितिसामानिगायंति ।
ओं᳚शोमितिशस्त्राणि शं᳚सन्ति ॥ ओमित्यध्वर्युः प्रतिगरं प्रतिगृणाति ॥ ओमितिब्रह्मा
प्रसौति ... ब्रह्मोपाप्नवानीति ॥ ब्रह्मैवोपाप्नोति ॥ ओमित्यग्निहोत्रमनुजानाति ॥ ओमितिब्रा
ह्मणः प्रवक्ष्यन्नाह ब्रह्मोपाप्नवानीति ॥ ब्रह्मैवोपाप्नोति ॥ १ ॥ ओं ऋतंचस्वाध्याय
प्रवचने च ॥ सत्यं च स्वाध्यायप्रवचने च ॥ तपश्च स्वा० दमश्च स्वा० । शमश्च स्वा० । अग्नयश्च
स्वा० ॥ अग्निहोत्रं च स्वा० ॥ अतिथयश्च स्वा० ॥ मानुषं च स्वा० । प्रजा च स्वा० । प्रजनश्च स्वा० ॥
प्रजातिश्च स्वा० । सत्यमिति सत्यवचा राथीतरः ॥ तप इति तपोनित्यः पौरुशिष्टिः ॥ स्वाध्या
प्रवचने एवेति नाको मौद्गल्यः ॥ तद्धि तपस्तद्धि तपः ॥ स्वा प्रजा च स्वाध्यायप्रवच
नेच प्रज च ॥ अहं वृक्षस्य रेरिवा कीर्त्तिः पृष्ठं गिरेरिव ॥ ऊर्ध्वपवित्रो वाजिनीव स्वमृतमस्मि ॥
द्रविणं᳚ सवर्चसं ॥ सुमेधा अमृतोक्षितः ॥ इति त्रिशंकोर्वेदानुवचनं ॥ अहं᳚ षट् ॥ वेदम
नूच्याचार्योंतेवासिनमनुशास्ति ॥ सत्यं वद ॥ धर्मं चर । स्वाध्यायान्मा प्रमदः ॥ आचार्याय
प्रियं धनमाहृत्य प्रजातंतुं मा व्यवच्छेत्सीः ॥ सत्यान्नप्रमदितव्यं ॥ ध

३

(9A)

र्मान्नप्रमदितव्यं ॥कुशलान्न०॥भूत्यैनप्र०॥स्वाध्यायप्रवचनाभ्यांनप्र०॥देवपितृकार्या
नप्र०॥मातृदेवोभव॥पितृदेवोभव॥आचार्यदेवोभव॥अतिथिदे०॥यान्यनवद्यानिकर्मा
णि॥तानिसेवितव्यानि॥नोइतराणि॥यान्यस्माकंसुचरितानि॥तानित्वयोपास्यानि॥नो
इतराणि॥येकेचास्मछ्रेयांसोब्राह्मणाः॥तेषांत्वयासनेनप्रश्वसितव्यं॥श्रद्धयादे
यं॥अश्रद्धयादेयं॥श्रियादेयं॥ह्रियादेयं॥भियादेयं॥संविदादेयं॥अथयदितेकर्मवि
चिकित्सावावृत्तविचिकित्सावास्यात्॥२॥येतत्रब्राह्मणाःसंमर्शिनः॥युक्ताआयुक्ताः॥अ
लूक्षाधर्मकामास्युः॥यथातेतत्रवर्तेरन्॥तथातत्रवर्तेथाः॥अथाभ्याख्यातेषु॥येतत्रब्राह्म
णाःसंमर्शिनः॥युक्ताआयुक्ताः॥अलूक्षाधर्मकामास्युः॥यथातेतेषुवर्तेरन्॥तथातेषु
वर्तेथाः॥एषआदेशः॥एषउपदेशः॥एषावेदोपनिषत्॥एतदनुशासनं॥एवमुपासि
तव्यं॥एवमुचैतदुपास्यं॥स्वाध्यायप्रवचनाभ्यांनप्रमदितव्यंतानित्वयोपास्यानिस्या
तेषुवर्तेरन्सप्तच॥शन्नोमित्रःशंवरुणः॥शन्नोभवत्वर्यमा॥शन्नइन्द्रोबृहस्पतिः॥शन्नो

विष्णुरुरुक्रमः ॥ नमो ब्रह्मणे ॥ नमस्ते वायो ॥ त्वमेव प्रत्यक्षं ब्रह्मासि ॥ त्वमेव प्रत्यक्षं ब्रह्म वादिष्यं
ऋतमवादिषं ॥ सत्यमवादिषं ॥ तन्मामावीत् ॥ तद्वक्तारमावीत् ॥ आवीन्मां ॥ आवीद्वक्तारं
सत्यमवादिषं चत्वारिच ॥ ॐ शांतिः शांतिः शांतिः ॥ शन्नश्चतुर्दश ॥ शन्नः शीक्षां सहनौ
यश्छंदसां भूः सयः पृथिव्योमित्यृतंचाहं वेद मनस्यथान्नो द्वादश ॥ शन्नो मह इत्यादित्यो
नो इत्योरा॥ त्रयोवि शति ॥ शन्नो मित्रः ॥ इति शीक्षोपनिषत्समाप्ता ॥ ओम ॥ सह
नाववतु । सनौ भुनक्तु ॥ सहवीर्यं करवावहै ॥ तेजस्विनावधीतमस्तु मा विद्विषा
वहै ॥ ॐ शांतिः शांतिः शांतिः ॥ हरिः ॐ ॥ ब्रह्मविदाप्नोति परं ॥ तदेषाभ्युक्ता ॥
सत्यं ज्ञानमनंतं ब्रह्म ॥ यो वेद निहितं गुहायां परमे व्योमन् ॥ सोश्नुते सर्वान्कामान्सह
ब्रह्मणा विपश्चितेति ॥ तस्माद्वा एतस्मादात्मन आकाशः संभूतः ॥ आकाशाद्वायुः ॥
वायोरग्निः ॥ अग्नेरापः ॥ अद्भ्यः पृथिवी ॥ पृथिव्या ओषधयः ॥ स्यैदं मेव शिरः ॥ अयं
दक्षिणः पक्षः ॥ अयमुत्तरः पक्षः ॥ अयमात्मा । इदं पुच्छं प्रतिष्ठा ॥ तदप्येष श्लोको भव
ति ॥ १ ॥ अन्नाद्वै प्रजाः प्रजायंते ॥ याः काश्च

Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan

(5A)

प्रथिवी ऽश्रिताः ॥ अथो अन्नेनैव जीवंति ॥ अथैनदपियंत्यंततः ॥ अन्नं हि भूतानां ज्येष्ठं ॥
तस्मात्सर्वौषधमुच्यते ॥ सर्वं वै तेन्नमाप्नुवंति ॥ येन्नं ब्रह्मोपासते ॥ अन्नं हि भूतानां ज्येष्ठं ॥
तस्मात्सर्वौषधमुच्यते ॥ अन्नाद्भूतानि जायंते ॥ जातान्यन्नेन वर्द्धंते ॥ अद्यते ऽत्ति च भूतानि
तस्मादन्नं तदुच्यत इति ॥ तस्माद्वा एतस्मादन्नरसमयात् ॥ अन्योंतर आत्मा प्राणमयः ॥ तेनै
ष पूर्णः ॥ स वा एष पुरुषविध एव ॥ तस्य पुरुषविधतां ॥ अन्वयं पुरुषविधः ॥ तस्य प्राण एव
शिरः ॥ व्यानो दक्षिणः पक्षः ॥ अपान उत्तरः पक्षः ॥ आकाश आत्मा ॥ पृथिवी पुच्छं प्रतिष्ठा
॥ तदप्येष श्लोको भवति ॥ २ ॥ प्राणं देवा अनु प्राणंति ॥ मनुष्याः पशवश्च ये ॥ प्राणो हि भूता
भूतानामायुः ॥ तस्मात्सर्वायुषमुच्यते ॥ सर्वमेव त आयुर्यंति ॥ ये प्राणं ब्रह्मोपासते ॥
प्राणो हि भूतानामायुः ॥ तस्मात्सर्वायुषमुच्यत इति ॥ तस्यैष एव शारीर आत्मा ॥ यः
पूर्वस्य ॥ तस्माद्वा एतस्मात्प्राणमयात् ॥ अन्योंतर आत्मा मनोमयः ॥ तेनैष पूर्णः ॥ स वा
२ तस्य एष पुरुषविध एव ॥ पुरुषविधतां ॥ अन्वयं पुरुषविधः ॥ तस्य यजुरेव शिरः ॥ ऋग्
दक्षिणः पक्षः ॥ सामोत्तरः पक्षः ॥ आदेश आत्मा ॥ अथर्वांगिरसः पुच्छं प्रतिष्ठा ॥ तदप्ये
ष श्लोको भवति ॥ ३ ॥ यतो वाचो निवर्त्तंते ॥ अप्राप्य मनसा सह ॥ आनं

५

दं ॰ ब्रह्मणोविद्वान ॥नबिभेतिकदाचनेति ॥तस्यैषएवशारीरआत्मा ॥यःपूर्वस्य ॥तस्मा ब्र २
द्वाएतस्मान्मनोमयात ॥अन्योंतरआत्माविज्ञानमयः॥तेनैषपूर्णः॥सवाएषपुरुषविधएव
तस्यपुरुषविधतां॥अन्वयंपुरुषविधः॥तस्यश्रद्धैवशिरः॥ऋतंदक्षिणःपक्षः॥स
त्यमुत्तरपक्षः॥योगआत्मा ॥महःपुच्छंप्रतिष्ठा॥तदप्येषश्लोकोभवति ॥४॥विज्ञा
नंयज्ञंतनुते ॥कर्माणितनुतेपिच ॥विज्ञानंदेवाःसर्वे ॥ब्रह्मज्येष्ठमुपासते ॥विज्ञा
नंब्रह्मचेद्वेद ॥तस्माच्चेन्नप्रमाद्यति॥शरीरेपाप्मनोहित्वा॥सर्वान्कामान्समश्नुते
इति ॥तस्यैषएवशारीरआत्मा॥यःपूर्वस्य ॥तस्माद्वाएतस्माद्विज्ञानमयात ॥अन्यों
तरआत्मानंदमयः॥तेनैषपूर्णः॥सवाएषपुरुषविधएव ॥तस्यपुरुषविधतां श्री
अन्वयंपुरुषविधः॥तस्यप्रियमेवशिरः॥मोदोदक्षिणःपक्षः॥प्रमोदउत्तरपक्षः॥
आनंदआत्मा।ब्रह्मपुच्छंप्रतिष्ठा।तदप्येषश्लोकोभवति ॥५॥असन्नेवसभवति
असद्ब्रह्मेतिवेदचेत ॥अस्तिब्रह्मेतिचेद्वेद ॥संतमेनंततोविदुरिति।तस्यै
षएवशारीरआत्मा।यःपूर्वस्य ॥अथातोनुप्रश्नाः॥उता विद्वानमुं

५

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

(6A)

लोकंप्रेत्य॥कश्चनगच्छती॥आहोविद्वानमुंलोकंप्रेत्य॥कश्चित्समश्नुता३उ॥सोकामयत॥
बहुस्यांप्रजायेयेति॥सतपोतप्यत॥सतपस्तप्त्वा॥इदꣳसर्वमसृजत॥यदिदंकिंच॥
तत्सृष्ट्वा॥तदेवानुप्राविशत्॥तदनुप्रविश्य॥सच्चत्यच्चाभवत्॥निरुक्तंचानिरुक्तंच
निलयनंचानिलयनंच॥विज्ञानंचाविज्ञानंच॥सत्यंचानृतंचसत्यमभवत्॥यदिदंकिंच
तत्सत्यमित्याचक्षते॥तदप्येषश्लोकोभवति॥६॥असद्वाइदमग्रआसीत्॥ततोवै
सदजायत॥तदात्मानꣳस्वयमकुरुत॥तस्मात्तत्सुकृतमुच्यतइति॥यद्वैतत्सुकृतं
रसोवैसः॥रसꣳह्येवायंलब्ध्वानंदीभवति॥कोह्येवान्यात्कःप्राण्यात्॥यदेष
आकाशआनंदोनस्यात्॥एषह्येवानंदयाति॥यदाह्येवैषएतस्मिन्नदृश्येनात्म्येनिरुक्तेनि
लयनेभयंप्रतिष्ठांविंदते॥अथसोभयंगतोभवति॥यदाह्येवैषएतस्मिन्नुदरमंतरंकुरुते
अथतस्यभयंभवति॥तत्त्वेवभयंविदुषोमन्वानस्य॥तदप्येषश्लोकोभवति॥७॥भीषा
स्माद्वातःपवते॥भीषोदेतिसूर्यः॥भीषादग्निश्चेंद्रश्च॥मृत्युर्धावतिपंचमइति॥सैषानं
दस्यमीमाꣳसाभवति॥युवास्यात्साधुयुवाध्यायकः॥आशिष्ठोदृढिष्ठोबलिष्ठः॥तस्ये
यंपृथिवीसर्वावित्तस्यपूर्णास्यात्॥सएकोमानुषआनंदः॥तेये

Joint Project of the Rajawade Samshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

६

गंध

शतंमानुषा आनंदाः ॥ स एको मनुष्य[गंध]र्वाणामानंदाः ॥ स एको देवगंधर्वाणामानंदः ॥ श्रो
त्रियस्य चाकामहतस्य ॥ यते ये शतं मनुष्यगंधर्वाणामानंदाः ॥ स एको वै देवगंधर्वाणा
मानंदाः । श्रोत्रियस्य चाकामहतस्य । ते ये शतं देवगंधर्वाणामानंदाः ॥ स एकः पितृणां
चिरलोकलोकानामानंदः ॥ श्रोत्रियस्य ॰ ॥ ते ये शतं पितृणां चिरलोकलोकानामा
नंदाः स एक आजानजानां देवानामानंदः ॥ श्रोत्रियस्य ॰ । ते ये शतमाजानजानां
देवानामानंदाः । स एकः कर्मदेवानां देवानामानंदः । ये कर्मणा देवानपियंति ।
श्रोत्रियस्य ॰ ते ये शतं कर्मदेवानां देवानामानंदाः ॥ स एको देवानामानंदः ॥
श्रोत्रियस्य चा ॰ ॥ ते ये शतं देवानामानंदाः ॥ स एक इंद्रस्यानंदः । श्रो ॰ ॥ ते ये शत श्री ७
मिंद्रस्यानंदाः । स एको बृहस्पतेरानंदः । श्रोत्रि ॰ ते ये शतं बृहस्पतेरानंदाः । स
एकः प्रजापतेरानंदः । श्रोत्रि ॰ । ते ये शतं प्रजापतेरानंदाः ॥ स एको ब्रह्मण आ
नंदः । श्रोत्रि ॰ स यश्चायं पुरुषे ॥ यश्चासावादित्ये । स एकः ॥ स य एवंवित् ॥
अस्माल्लोकात्प्रेत्य ॥ एतमन्नमयमात्मानमुपसंक्रामति ॥ एतं प्राणमयमा
त्मानमुपसंक्रामति ॥ एतं मनोमयमात्मा ॰ एतं विज्ञानमयमा ॰

या

(7A) श्री ३ ८

एतमानंदमयमा० ॥ तदप्येष श्लोको भवति ॥८॥ यतो वाचो निवर्तंते ॥ अप्राप्य मनसा सह ॥
आनंदं ब्रह्मणो विद्वान ॥ न बिभेति कुतश्चनेति ॥ एतꣳ ह वाव न तपति ॥ किमहꣳ सा
धु नाकरवं ॥ किमहं पापमकरवमिति ॥ स य एवं विद्वानेते आत्मानꣳ स्पृणुते ॥
उभे ह्येवैष एते आत्मानꣳ स्पृणुते ॥ य एवं वेद ॥ इत्युपनिषत् ॥९॥ सह नाववतु ॥
सह नौ ब्रह्मविदिदमयमिदमेकविꣳशतिरन्नाद्दन्नरसमय प्राणो व्यानोऽपान आकाशः
पृथिवी पुच्छꣳ षड्विꣳशतिः प्राणं ए जुर्ऋक्सामादेशोथर्वांगिरसः पुच्छं द्वाविꣳशति
र्यत श्रेयतꣳ स सत्यं योगो महो बुद्धिर्भावं विज्ञानं प्रियं मोदः प्रमोद आनंदो ब्रह्म पुच्छं द्वा
विꣳशतिरसन्नेव साधु द्वाविꣳ सं रसꣳ सोऽ भीषास्मान्मानुषो मनुष्य गंधर्वाणां देवगंध
र्वाणां पितृणां चिरलोकलोकानामाजानजानां कर्मदेवानां ये कर्मणा देवानामिंद्रस्य बृह
स्पतेः प्रजापतेर्ब्रह्मणः स यश्चासंक्रमत्येकपंचाशद्यतः कुतश्चनैतमेकादशानव ॥ ब्रह्म
विदाप्नोत्यसन्नेव विꣳशतिर्विꣳशतिः ॥ सह नाववतु ॥ सह नौ भुनक्तु ॥ सह वीर्यं कि
रवावहै ॥ तेजस्विनावधीतमस्तु मा विद्विषावहै ॥ ॐ शांतिः शांतिः शांतिः ॥ ॐ ॐ सह
नाववतु ॥ सह नौ ॥ हरिः ॐ ॥ भृगुर्वै वारुणिः । वरुणं पितरमुपससार ॥ अधीहि

७ भगवो ब्रह्मेति ॥तस्मा एतत्प्रोवाच ॥अन्नं प्राणं चक्षुः श्रोत्रं मनो वाचमिति ॥तं होवाच ॥यतो वा
इमानि भूतानि जायंते ॥येन जातानि जीवंति ॥यत्प्रयंत्यभिसंविशंति ॥तद्विजिज्ञासस्व ॥तद्ब्र
ह्मेति ॥सतपोतप्यत ॥सतपस्तप्त्वा ॥१॥ अन्नं ब्रह्मेति व्यजानात् ॥अन्नाद्ध्येव खल्विमानि भूता
नि जायंते ॥अन्नेन जातानि जीवंति ॥अन्नं प्रयंत्यभिसंविशंतीति ॥तद्विज्ञाय ॥पुनरे
व वरुणं पितरमुपससार ॥अधीहि भगवो ब्रह्मेति ॥तं होवाच ॥तपसा ब्रह्म विजिज्ञासस्व
तपो ब्रह्मेति ॥सतपोतप्यत ॥सतपस्तप्त्वा ॥प्राणो ब्रह्मेति व्यजानात् ॥प्राणाद्ध्येव खल्विमा
नि भूतानि जायंते ॥प्राणेन जातानि जीवंति ॥प्राणं प्रयंत्यभिसंविशंतीति ॥तद्विज्ञा
य ॥पुनरेव वरुणं पितरमुपससार ॥अधीहि भगवो ब्रह्मेति ॥तं होवाच ॥तपसा ब्र
ह्म विजिज्ञासस्व ॥तपो ब्रह्मेति ॥सतपोतप्यत ॥सतपस्तप्त्वा ॥३॥ मनो ब्रह्मे जानात्
मनसो ह्येव खल्विमानि भूतानि जायंते ॥मनसा जातानि जीवंति ॥मनः प्रयंत्यभि
संविशंतीति ॥तद्विज्ञाय ॥पुनरेव वरुणं पितरमुपससार ॥अधीहि भगवो ब्रह्मेति
तं होवाच ॥तपसा ब्रह्म विजिज्ञासस्व ॥तपो ब्रह्मेति ॥सतपोतप्यत ॥सतपस्तप्त्वा ॥४॥
विज्ञानं ब्रह्मेति व्यजानात् ॥विज्ञानाद्ध्येव खल्विमानि भूतानि जायंते ॥विज्ञानेन

(8A)

जातानि जीवंति ॥ विज्ञानंप्रयंत्यभिसंविशंतीति ॥ तद्विज्ञाय ॥ पुनरेववरुणंपितरमुपस
सार ॥ अधीहि भगवो ब्रह्मेति ॥ तं होवाच ॥ तपसा ब्रह्म विजिज्ञासस्व ॥ त
पो ब्रह्मेति ॥ सतपोतप्यत ॥ सतपस्तप्त्वा ॥ ५ ॥ आनंदो ब्रह्मेति व्यजानात्
आनंदाद्ध्येवखल्विमानि भूतानि जायंते ॥ आनंदेन जातानि जीवंति ॥ आनंदंप्र
यंत्यभिसंविशंतीति ॥ सैषा भार्गवी वारुणी विद्या ॥ परमे व्योमन्प्रतिष्ठिता ॥
यएवंवेद प्रतितिष्ठति ॥ अन्नवानन्नादो भवति ॥ महान्भवति प्रजयाप
शुभिर्ब्रह्मवर्चसेन ॥ महान्कीर्त्या ॥ ६ ॥ अन्नं ननिंद्यात् ॥ तद्व्रतं ॥ प्राणो
वा अन्नं ॥ शरीरमन्नादं ॥ प्राणेशरीरं प्रतिष्ठितं ॥ शरीरे प्राणः प्रतिष्ठितः ॥ तदेतद
न्नमन्ने प्रतिष्ठितं ॥ सय एतदन्नमन्ने प्रतिष्ठितं वेद प्रतितिष्ठति ॥ अन्नवानन्ना
दो भवति ॥ महान्भवति प्रजया पशुभिर्ब्रह्मवर्चसेन ॥ महान्कीर्त्या ॥ ७ ॥ अ
न्नं नपरिचक्षीत ॥ तद्व्रतं ॥ आपोवा अन्नं ॥ ज्योतिरन्नादं ॥ अप्सु ज्योतिः प्रति
ष्ठितं ॥ ज्योतिष्यापः प्रतिष्ठिताः ॥ तदेतदन्नमन्ने प्रतिष्ठितं ॥ सय एतदन्नम
न्ने प्रतिष्ठितं वेद प्रतितिष्ठति ॥ अन्नवानन्नादो भवति ॥ ... ॥ बलानि तितिवि घुति ॥

Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan

८

(१)

यशइतिपशुषु ॥११॥ ज्योतिरितिनक्षत्रेषु ॥ प्रजातिरमृतमानंद इत्युपस्थे ॥ सर्व
मित्याकाशे ॥ तत्प्रतिष्ठेत्युपासीत ॥ प्रतिष्ठावान्भवति ॥ तन्मह इत्युपासीत
महान्भवति ॥ तन्मन इत्युपासीत ॥ मानवान्भवति ॥ तंनम इत्युपासीत ॥ नम्यं
तेस्मैकामाः ॥ तद्ब्रह्मेत्युपासीत ॥ ब्रह्मवान्भवति ॥ तद्ब्रह्मणः परिमर इत्युपा
सीत ॥ पर्येणंम्रियंते द्विषंतः सपत्नाः ॥ परियेप्रिया भ्रातृव्याः ॥ सयश्चायंपुरुषे ॥
यश्चासावादित्ये ॥ सएकः ॥ सयएवंवित् ॥ अस्माल्लोकात्प्रेत्य ॥ एतमन्नमयमा
त्मानमुपसंक्रम्य ॥ एतंप्राणमयमात्मानमुपसंक्रम्य ॥ एतंमनोमयमात्मा
नमुपसंक्रम्य ॥ एतंविज्ञानमयमात्मानमु० ॥ एतमानंदमयमात्मानमुपसंक्रम्य श्री
इमाँल्लोकान्कामान्नीकामरूप्यनुसंचरन् ॥ एतत्सामगायन्नास्ते ॥ हा३वुहा३
वुहा३वु ॥ अहमन्नमहमन्नमहमन्नं ॥ अहमन्नादो३ अहमन्नादो३ अह
मन्नादः ॥ अहं श्लोककृदहं श्लोककृदहं श्लोककृत् ॥ अहमस्मिप्रथ
मजाऋता३स्य ॥ पूर्वंदेवेभ्योअमृतस्यना३भायि ॥ योमाददातिसइदेवमा३व
ह ॥ अहमन्नमन्नमदंतमा३द्मि ॥ अहंविश्वंभुवनमभ्यभवा३ं ॥

८

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(2A)

सुवर्णज्योतीः ॥ य एवं वेद ॥ इत्युपनिषत् ॥ अध्यत्तेवि चुति भानवान नवस्य कोहा एवु
य एवं वेदे कं स ॥ भृगुस्तस्मै यतो विशांति तद्वि जिज्ञासस्व तद्ब्रह्मेति तत्रयोदशान्नं
प्राणो मनो विज्ञानमिति विज्ञाय तं तपसा द्वादश द्वादशानंद इति सैषा दशान्नं ननिं
धात्प्राणः शरीरमन्नं न परिचक्षीत आपो ज्योतिरन्नं वहु कुर्वीत पृथिव्यामाकाश ए
कादशैकादशैकादशानकं चैकवष्टिरेकान्नं वि॰शतिरेकान्नवि॰शतिः ॥ भृ
गुर्य एवं वेद पंचदश ॥ सहनाववतु ॥ सहनौ भुनक्तु ॥ सह वीर्यं करवावहै ॥ ते
जस्विनावधितमस्तु माविद्विषावहै ॥ ॐ शांतिः शांतिः शांतिः ॥ ॐ गणेशाय नमः ॥
ॐ तत्पुंयो याद्वणीमहे ॥ गातुं यज्ञाय ॥ गातुं यज्ञपतये ॥ देवी स्वस्तिरस्तु नः ॥ स्वस्ति
र्मानुषेभ्यः ॥ ऊर्ध्वं जिगातु भेषजं ॥ शन्नो अस्तु द्विपदे ॥ शं चतुष्पदे ॥ ॐ शांतिः
शांतिः शांतिः ॥ हरिः ॐ ॥ चित्तिस्त्रुक ॥ चित्त माज्यं ॥ वाग्वेदिः ॥ आधीतं बर्हिः
केतो अग्निः ॥ विज्ञात मग्निः ॥ वाचस्पतिर्होता ॥ मनउपवक्ता ॥ प्राणो हविः ॥ साम
ध्वर्युः ॥ वाचस्पते विधे नामन् ॥ विधेमते नाम ॥ विधे स्त्व मस्माकं

Joint property of Rajawade Sanshodhan Mandal, Dhule and the Yeshwantrao Chavan Pratishthan, Mumbai

(10)

२

अध्वर्युः

नाम ॥ वाचस्पतिसोमं । बपिन्तु ॥ आस्मासु नृम्णां धा स्वाहा ॥ अध्वर्युः पंचव ॥ पृ
थिवीहोता ॥ घोर ध्वर्युः ॥ रुद्राग्नीत् ॥ बृहस्पति रुपवक्ता ॥ वाचस्पते वाचो
वीर्येण ॥ संभृततमेनायक्ष्यसे ॥ यजमानाय वार्यं ॥ आस्रुवस्करस्मै ॥ वाच
स्पतिः सोमंपिबति ॥ जजनदिंद्रमिंद्रियाय स्वाहा ॥ २ ॥ पृथिवी होता दश ॥
अग्निर्होता । अश्विना ध्वर्यु ॥ त्वष्टाग्नीत् ॥ मित्र उपवक्ता । सोमः सोमस्य पुरोगा । शुक्रः
शुक्रस्य पुरोगाः ॥ श्रातास्त इंद्र सोमाः ॥ वातापेर्हवन श्रुतस्वाहा ॥ ३ ॥ अग्निर्होता
... ष्टौ ॥ सूर्यं ते चक्षुः ॥ वातं प्राणः ॥ द्यां पृष्ठं ॥ अंतरिक्षमात्मा ॥ अंगैर्यज्ञं ॥ पृ
थिवीं शरीरैः ॥ वाचस्पतेच्छिद्रया वाचा ॥ अच्छिद्रया जुह्वा ॥ दिविदेवावृ
धं होत्रामेरयस्व स्वाहा ॥ ४ ॥ सूर्यं ते नव ॥ महाहविर्होता ॥ सत्यहविरध्वर्युः ॥
अच्युतपाजा अग्नीत् ॥ अच्युतमना उपवक्ता ॥ अनाधृष्यश्चाप्रतिधृष्यश्च यज्ञ
स्याभिगरौ ॥ अयास्य उद्गाता ॥ वाचस्पते हृद्विधे नामन् ॥ विधेम ते नाम ॥ विधे
स्त्वमस्माकं नाम ॥ वाचस्पतिः सोममपात् ॥ मा दैव्य

२

(10A)

स्तंतुश्चेदिमामनुष्य:॥नमोदिवे॥नम:पृथिव्यैस्वाहा॥५॥अपात्रीपिव॥वा
ग्घोता॥दीक्षापत्नी॥वातोध्वर्यु:॥आपोभिगर:॥मनोहवि:।तपसिजुहोमि।भू
भुव:सुव:।ब्रह्मस्वयंभु॥ब्रह्मणेस्वयंभुवेस्वाहा॥६॥वाग्घोतानव॥ब्राह्मणएक
होता॥सयज्ञ:।समेददातुप्रजांपशून्पुष्टिंयश:॥यज्ञश्चमेभूयात्॥अग्निर्द्विहोता।
सभर्ता।समेददाप्रजांपशून्पुष्टिंयश:॥भर्ताचमेभूयात्॥पृथिवीत्रिहोता।सप्रति
ष्ठा।चमेभूयात्॥अंतरिक्षंचतुर्होता॥सविष्ठा:॥समेददातुप्रजांपशून्पुष्टिंयश:॥
विष्ठाश्चमेभूयात्॥वायु:पंचहोता।सप्राण:॥समेददा०।प्राणश्चमेभूयात्॥चंद्र
माषड्ढोता॥सऋतून्कल्पयाति।समेददा०॥ऋतवश्चमेकल्पंतां॥अन्नंसप्तहोता
सप्राणस्यप्राण:॥समेददा०॥प्राणस्यमेप्राणोभूयात्॥द्यौरष्टहोता॥सोनाधृ
ष्य:।समेददा०॥अनाधृष्यश्चभूयासं॥आदित्योनवहोता॥सतेजस्वी॥समेददा
तुप्रजांपशून्पु०।तेजस्वीचभूयासं॥प्रजापतिर्दशहोता॥सइदंसर्वं॥समेददा
तु०।सर्वंचमेभूयात्॥प्रतिष्ठाप्राणश्चमेभूयादनाधृष्य:सर्वंमेभूयात्॥७॥ब्राह्म

Joint project of Rajwade Sanshodhan Mandal, Dhule and Yashwantrao Chavan Pratishthan, Mumbai.

## मूळ प्रत पाहण्यासाठी संपर्क

**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**
राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)
**दूरध्वनी क्रमांक** (०२५६२) २३३८४८
**Email ID** : rajwademandaldhule@gmail.com